८० संं.

७ पत्रे
संपूर्ण

व्यासपूजा

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

८०

(1)

श्रीगणेशायनमः आषाढपौर्णमास्यांव्यासपूजा तत्रत्रिमूर्तीकर्ता
चेत्सरैरेवग्राह्या व्यासपूजांप्रवक्ष्यामिसम्यक्कंपीठसिद्धये कृत्वा
नुष्ठानमाषाढ्यांपूजागंधानिधापयेत १ प्राणायामत्रयंकृत्वाषडं
गन्यासपूर्वकं व्यासपूजांकरिष्यामीत्युक्तातुसलिलंस्पर्शेत २
तत्रप्रयोगः प्रातःकृतनित्यक्रियोगंगादौक्षौरंकृत्वास्नात्वापूजा
स्थानमागत्यगोमयेनोपलिप्तभूमौसर्वतोभद्रं विरच्य तत्सान्निम
देशेआसनंन्यस्य सुमुखश्चेत्यादिदेशकालौस्मृत्वाव्यासपू
जांकरिष्यामीतिसंकल्प्य प्राणानायम्यासनेदिग्बंधना
दिप्रणवस्यऋष्यादिषडंगध्यानंचपुरुषसूक्तेनस्वशरीरे

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(2)

व्यासपू० न्यासंकृत्वाकलशाराधनंशंखार्चनंविधायशंखोदकेनपूजाद्रव्य
१ मात्मानंचप्रोक्ष्यसर्वतोभद्रेतंडुलपुंजोपरिदेवतावाहनंकुर्यात्
यथा मध्ये ॐब्रह्मणेनमः ब्रह्माणमावाहयामि उत्तरे सोमाय
नमः सोमं० ईशान्ये ईशानायनमः ईशानं० पूर्वे इंद्राय० इंद्रं० आग्ने
य्यां अग्नये० अग्निं० दक्षिणे यमाय० यमं० नैर्ऋत्यां निर्ऋतये० नि
र्ऋतिं० पश्चिमे वरुणाय० वरुणं० वायव्ये वायवे० वायुं० वायुसो
ममध्ये अष्टौवसुभ्यो० सोमेशानमध्ये एकादशरुद्रेभ्यो० ईशा
नेंद्रमध्ये द्वादशादित्येभ्यो० इंद्राग्निमध्ये अश्विभ्यां० अग्निय राम
ममध्ये विश्वेभ्योदेवेभ्यःसपैतृकेभ्यो० यमनिर्ऋतिमध्ये स १

Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

नयक्षेभ्यो॰ निर्ऋतिवरुणमध्ये भूतनागेभ्यो॰ वरुणवायुमध्ये गं
धर्वाप्सरसेभ्यो॰ ब्रह्मसोममध्ये स्कंदाय॰ ऋषभाय॰ शूलमहाका
लाभ्यां॰ ब्रह्मेशानमध्ये दक्षादिसप्तगणेभ्यो॰ ब्रह्मेंद्रमध्ये दुर्गायै॰
विष्णवे॰ ब्रह्माग्निमध्ये स्वधायै॰ ब्रह्मयममध्ये मृत्युरोगेभ्यो॰ ब्र
ह्मनिर्ऋतिमध्ये गणपतये॰ ब्रह्मवरुणयोर्मध्ये अद्भ्यः॰ ब्रह्मवायु
मध्ये मरुद्भ्यो॰ ब्रह्मणः पादमूले कर्णिकाधः पृथिव्यै॰ तथैव सप्त
सागरेभ्यो॰ गंगादिसप्तनदीभ्यो॰ ब्रह्मोपरि मेरवे नमः॰ बाह्यप
रिधौ सोमादिसंनिधौ क्रमेणायुधावाहनं गदायै॰ त्रिशूला
य॰ वज्राय॰ शक्तये॰ दंडाय॰ खड्गाय॰ पाशाय॰ अंकुशाय॰ ४॰

(3)

व्यासपू॰ तद्बाह्ये उत्तरादितः गौतमाय॰ भरद्वाजाय॰ विश्वामित्राय॰ कश्य
२ पाय॰ जमदग्नये॰ वसिष्ठाय॰ अत्रये॰ अरुंधत्यै॰ ४८ तद्बहिः पूर्वा
दिदिक्षु ऐंद्र्यै॰ कौमार्यै॰ ब्राह्म्यै॰ वाराह्यै॰ चामुंडायै॰ वैष्णव्यै॰ मा
हेश्वर्यै॰ वैनायक्यै॰ ५६ इतिषट्पंचाशद्देवताः सर्वतोभद्रे पूज्याः
ब्रह्मादिभ्योनमः आसनादि मंत्रपुष्पांजलिं संपूज्य तत्रमध्येम
हीद्यौरित्यादिकलशोपूर्णपात्रंनिधानांते वरुणमावाह्य संपूज्य
पूर्णपात्रोपरिवस्त्रेगंधेनद्वादशारांलिखेत् यथा मध्येत्रिको
णं तद्बहिः षट्कोणं तद्बहिर्वृत्तं तत्कर्णिका तद्बहिरष्टौदलानि राम
प्रतिदलाग्रे द्वादशारान् यवाकारान्कुर्यात् तद्बहिश्चतुर्द्वारं २

(3A)

चतुरस्त्रं विलिख्य त्रिकोणषट्कोणात्मकवृत्तरूपकर्णिकायां कृ
ष्णपंचकं तत्पूर्वेह्यष्टदलेषु अष्टौ पंचकानीति लिखेत् पुनर्देशका
लौ संकीर्त्य शुचिप्रतिपदमारभ्याषाढपौर्णिमापर्यंतं यावच्चतुरो मासांश्च
प्रावृषि अंडजोद्भिज्यादिबहुप्राणिसंकुलितमार्गे यात्रानिवृत्त्यर्थं श्री
कृष्णव्यासाचार्यादीनां संनिधानसिद्ध्यर्थं भिक्षाटनाद्यखिलगम
नागमनदोषनिवृत्त्यर्थं व्यासोक्तविधानेन सकलदेवतास्थापनपूजा
द्यहं करिष्ये तत्र पीठे द्वादशारे मध्यकर्णिकायां आं आधारशक्त्यै०
ॐ कूर्माय० अं अनंताय० पृं पृथिव्यै० क्षां क्षीरसमुद्राय० श्वें श्वेतद्वी
पाय० मं मणिमंडपाय० कं कल्पवृक्षेभ्यो न० रं रत्नवेदिकायै० रं र

(५)

व्यासपू० त्त सिंहासनाय० सं सर्वशक्तिकमलासनाय० पीठकोणेषु आग्नेय्यां
३ गं गणपतये० गणपतिं आवाहयामि नैर्ऋत्ये सं सरस्वत्यै० वायव्ये
डुं दुर्गायै० ईशान्ये क्षां क्षेत्रपालाय० कृष्णपंचकस्याग्निये ब्रह्मणे०
ईशान्ये रुद्राय० पीठमध्ये मूलमंत्रेण ॐ कृष्णाय० कृष्णं आ० म
ध्ये पूर्वे वासुदेवाय० दक्षिणे संकर्षणाय० पश्चिमे प्रद्युम्नाय० उत्तरे
अनिरुद्धाय० कृष्णपंचकस्य दक्षिणे मध्ये वेदव्यासाय० पूर्वे वैशं
पायनाय० दक्षिणे सुमंतवे० पश्चिमे जैमिनये० उत्तरे पैलाय०
कृष्णपंचकस्योत्तरे मध्ये शंकराचार्येभ्यो० शंकराचार्यान्० राम
पूर्वे विश्वरूपाचार्येभ्यो० दक्षिणे पद्मपादाचार्येभ्यो० पश्चि ३

(3A)

मेहस्तामलकाचार्येभ्यो॰ उत्तरे त्रोटकाचार्येभ्यो॰ कृष्णापंचकस्यपश्चि
मेमध्येसनकाय॰ पूर्वेसनंदनाय॰ दक्षिणेसनातनाय॰ पश्चिमेसन
कुमाराय॰ उत्तरेकपिलाय॰ कृष्णापंचकस्यनैऋत्येमध्येऋषभाय॰
पूर्वेदत्तात्रेयाय॰ दक्षिणेशुकाय॰ पश्चिमेनारदाय॰ उत्तरेसंवर्ताय॰
कृष्णापंचकस्यवायव्येमध्ये॰ श्वेतकेतवे॰ श्वेतकेतुं॰ पूर्वेदुर्वासाय॰
दक्षिणेजडभरताय॰ पश्चिमेरैवताय॰ उत्तरेवामदेवाय॰ कृष्णापंच
कस्यपूर्वेमध्येद्रविडाचार्येभ्यो॰ द्राविडाचार्यान्॰ पूर्वेगोविंदभग
वत्पूज्यपादाचार्य॰ गोविं॰ यांना॰ दक्षिणेगौडपादाचार्येभ्यो॰ प
श्चिमे विवरणाचार्येभ्यो॰ उत्तरे समस्तब्रह्मविद्याप्रवर्त्तकाचार्य॰

(5)

व्यासपू० कृष्णपंचकस्याग्नेयेमध्येगुरुभ्यो० पूर्वेपरमगुरुभ्यो० दक्षिणेपरमे
४ ष्ठीगुरुभ्यो० पश्चिमेपरात्परगु० उत्तरेसमस्तब्रह्मविद्यासंप्रदायि
भ्यो० कृष्णपंचकस्यईशानमध्ये आत्मनेनमः पूर्वेअंतरात्मने० द
क्षिणेपरमात्मने० पश्चिमेसर्वात्मने० उत्तरेपरब्रह्मणे० ततोदिक्षु
प्रागादिलोकपालानावाहनं इंद्राय० अग्नये० यमाय० निर्ऋतये०
वरुणाय० वायवे० सोमाय० ईशानाय० ईशानपूर्वमध्येब्रह्मणे०
निर्ऋतिवरुणमध्येअनंताय० इत्यावाह्य पुरुषसूक्तेनषोडशो
पचारैःसंपूज्यस्तुत्वानमेत् पुष्पांजलिंवक्ष्यमाणमंत्रैर्दद्यात्॥ राम
कृष्णपंचके लक्ष्मीकलत्रंशतपत्रनेत्रंपूर्णेंदुवक्त्रंपुरुहूतमित्रं॥ ४

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

कारुण्यपात्रंकमनीयगात्रंवंदेपवित्रंवसुदेवपुत्रं १ नमस्तेवा
सुदेवायशुद्धबुद्धस्वरूपिणे हिरण्यरेतसेतुभ्यंप्राधान्यंव्यक्त
रूपिणं २ नमोस्त्वनंताय॰नमः ३ कामरूपंकालवंतंकामिनी
कामदंप्रभुं मन्मथंमथुरानाथंप्रद्युम्नंप्रणमाम्यहं ४ अनिरुद्धंम
होदारंकामिनंसुंदरंप्रियं नमाम्यहंप्रपन्नेशंफुल्लेंदीवरलोचनं ५
व्यासपंचकस्य वेदव्यासंस्वात्मरूपंसत्यसंधपरायणं जितेंद्रि
यंजितक्रोधंसशिष्यंप्रणमाम्यहं ६ आचार्यपंचकस्य सर्व
शास्त्रार्थतत्वज्ञंपरमानंदरूपिणं ब्रह्मण्यंशंकराचार्यंप्रण
मामिविवेकिनं ७ परासरपरंशांतंयोगींद्रंयोगिसेवितं जि

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

व्यासपू० तेंद्रियंजितक्रोधंसशिष्यंप्रणमाम्यहं ८ सर्वेषांदेवानांवेदमंत्रैः
५ पुष्पांजलिंदत्वा ततः गरुडासनोपविश्य भस्मगोपीचंदनकटिसू
त्रदंतकाष्ठमृत्तिकात्रिकटुत्रिफला इत्यादीनि पात्रेसंस्थाप्यसमर्पये
त् स्वासनेस्थित्वा नियमप्रार्थनांकुर्यात् माधवश्चतुरोमासान्स
र्वभूतहितायवै स्वापंयास्यसिशेषांकेलक्ष्म्यासहजगत्पते ९ स्फ
प्तश्चैवोत्थितोयावद्वेधावत्सनातनः अहंचतावद्वत्स्यामिसर्वभू
चै तहितायवैः प्रायेणप्रावृषिप्राणिसंकुलंवर्त्मदृश्यते अतस्तेषा
महिंसार्थंपक्षान्वैश्रुतिसंज्ञकान् ११ स्थास्यामिचतुरोमासान् राम
अत्रैवासतिबाधके चतुरोयंवसेन्मासान्द्वौवाकौशिकवार्षि ५

(6A) को १२ वार्षिकांश्चतुरोमासान्विहरेन्नयतिक्कचित् बीजांकुरादि
जीवानांहिंसातत्रयतोभवेत् १३ अंडजैरुद्भिज्जैर्वापिप्राणिभि
र्व्यथतेमही सूक्ष्मैर्व्यक्तैस्तथाव्यक्तैर्नानारूपैःसमंततः १४ एते
षांरक्षणार्थाय आषाढ्यांनिवसाम्यहं यतीनांप्रार्थना तदनंतरं
गृहस्थैर्यतिप्रार्थनांकुर्यात् उक्तवंतमितिब्रूयुःपार्श्वस्थायेद्विजो
त्तमाः १५ निवसंतुसुखेनात्रगमिष्यामिसदामुदा यथाशक्त्या
चशुश्रूषांकरिष्यामोवयंमुदा १६ चातुर्मास्यंयतीनांचयःकारय
तिधर्मवित् सर्वतीर्थेषुयत्पुण्यंसर्वदानेषुयत्फलं तत्सर्वंलभ
तेमर्त्यः आषाढ्यांविष्णुपूजनंतु इति ततोयतीश्वरैर्देवंप्रार्थयेत्॥

(७)

व्यासपू० शेषपर्यंकवर्येस्मिन्फणामणिगुणान्विते श्वेतद्वीपांतरेदेव कुरु
६ निद्रांजगत्पते सुप्तेत्वयिजगंनाथेजगत्सुप्तंभवेदिदं विबुद्धेच
प्रसंनोमेभवाम्भइतिप्रार्थना सप्तद्वीपेभोगिनाथेयोगिनाथस्थिते
त्वयि चातुर्मास्येव्रतेनुज्ञांदेहिलक्ष्मीपतेमम चतुरोवार्षिकान्मा
सान्देवस्योत्थापनावधि इमंकरिष्येनियमंनिर्विघ्नंकुरुमेच्युत
इदंव्रतंमयादेवगृहीतंपुरतस्तव निर्विघ्नंसिद्धिमायातुप्रसादा
त्तेरमापते नियमः सीमोल्लंघनमक्षौरंनद्युल्लंघनमेवच एकभि
क्षान्नकर्तव्या----व्रतमाचरेत् गृहीतेस्मिन्व्रतेदेवपंचत्वंय राम
दिनोभवेत् तदाभवतुसंपूर्णंप्रसादात्तेजनार्दन इतिप्रार्थ्य ६

(७A)

अनंतरं गृह्य खे गंधपुष्पधूपदीपनैवेद्यकोपीनाच्छादनदोरकंगो
पीचंदनमृद्दंतकाष्ठाद्युपचारैः सम्यक्संन्यासीनां पूजाकार्या त
तो द्वितीये दिवसे देवं संपूज्य विसर्जयेत्तद्दिने वा उत्तिष्ठोत्तिष्ठ
गच्छस्व पुनरागमनं कुरु प्रसीद देव देवेश परिवारेण संयुतः ना
समान सहायेषु निवसेद्योगवित्क्वचित् वसेत्समानशीलेषु
स्कशीलेषु तपस्विषु इति व्यासपूजाविधिः समाप्तः
१७९६ आश्वीनशुध्ये तृतीयायां नारायणभट्ट परांजेप

(४)

व्यासपू०
७

इतिव्यासपूजासमाप्ताः पत्रे ७

राम
७

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com